प्रश्न बैंक एवं ब्लूप्रिन्ट

कक्षा - पूर्वमध्यमा द्वितीय खण्डः

विषयः - पुराणेतिहासः

कोडः - 1019

महर्षि पतंजलि संस्कृत संस्थान भोपाल
क्रमांक 349
28-2-22

डॉ० (श्रीमती) उषा सिंह
शासकीय संस्कृत उ० मा० विद्यालय
विदिशा (म० प्र०)

प्र०1 :- उचित विकल्पं चिनुत - 1×6 = 6

प्र:1 क- पुराणेषु प्राप्यते -

अ- एकेश्वरवादः ब- द्वैतवादः स- भूतेश्वरवादः द- सर्वेश्वरवादः

ख- धृतराष्ट्रः कस्य पिता -

अ- युधिष्ठिरस्य ब- कर्णस्य स- दुर्योधनस्य द- द्रौपदी

ग- कः सूतपुत्रः ?

अ- भीष्मः ब- कर्णः स- विदुरः द- दुर्योधनः

घ- 'अग्निपुराणम्' कथ्यते -

अ- शब्दकोषः ब- विश्वकोषः स- अमरकोषः द- वित्तकोषः

ङ- पुरातनं वेदः वर्तते -

अ- ऋग्वेदः ब- यजुर्वेदः स- सामवेदः द- अथर्ववेदः

च- श्रीमद्भागवतपुराणे कति स्कन्धाः सन्ति ?

अ- नव ब- दश स- द्वादश द- अष्टादश

छ- चतुर्विंशति साहस्त्री वर्तते —

अ- रामायणम् ब- भागवतम् स- महाभारतम् द- पुराणम्

ज- कस्मिन् पुराणे सर्वाधिका श्लोक संख्या -

अ- कूर्मपुराणे ब- स्कन्दपुराणे स- ब्रह्मपुराणे द- श्रीमद्भागवतमहापुराणे

झ- कस्मिन् पुराणे सर्वाः विद्याः प्रदर्शिताः ?

अ- ब्रह्मपुराणे ब- वामनपुराणे स- वराहपुराणे द- अग्निपुराणे

ञ- सम्पूर्ण रामायणे कति श्लोकाः सन्ति ?

अ- २३००० ब- २४००० स- २१००० द- २५०००

त- रामायणे मुख्यरसः कः ?

अ- वीरः ब- शृङ्गारः स- करुणः द- शान्तः

थ- सूतपुत्रः कः ?

अ- विदुरः ब- दुर्योधनः स- कर्णः द- भीष्मः



—x—

## इकाई – 2

1×6=6

प्र०2- युग्मेलनं कुरुत -

| | |
|---|---|
| 1- विदुरः | (i) महाभारतम् |
| 2- माण्डव्यऋषिः | (ii) मनुः |
| 3. विदुरनीति | (iii) द्वापरयुग |
| 4- अंबा | (iv) सदाचारः |
| 5- सप्तस्रोतः | (v) आश्रमः |
| 6. धृतराष्ट्रः | (vi) शाल्वः |
| 7 पाण्डुः | (vii) धर्मराजः |
| 8. शान्तनुः | (viii) युधिष्ठिरः |
| 9. सतां आचारः | (ix) भीष्मः |
| 10. स्वायम्भुवः | (x) गांधारी |
| 11. पाण्डुराज्ञः पत्नी | (xi) सुभद्रा |
| 12. अभिमन्योः माता | (xii) शिवः |
| 13. वसुदेवस्य पुत्रः | (xiii) सप्त |
| 14. नीलकण्ठः | (xiiii) कृष्णः |
| 15- कुलपर्वताः | (xiiiii) पाञ्चाली |

— × — × —

प्र०3- आम् / न

इकाई - 3

1X6=6

1- अष्टादश पुराणानि सन्ति ।

2. नव पाण्डवाः आसन् ।

3. 'अग्निपुराणम्' महर्षि वेदव्यासेन विरचितम् ।

4. आत्मार्थे पृथ्वीं त्यजेत् ।

5- विदुरः दासीपुत्रः अस्ति ।

6. पुराणपूर्णचंद्रेण श्रुतिज्योत्स्ना प्रकाशिता ।

7. 'अग्निपुराणम्' भारतीयसंस्कृतेः विश्वकोषः अस्ति ।

8. मन्त्रब्राह्मणयोर्वेदनामधेयम् ।

9. हस्तिनापुरस्य अपरः नाम इन्द्रप्रस्थः नास्ति ।

10. युधिष्ठिरस्य अनुजः अर्जुनः नास्ति ।

11. अर्जुनस्य अपरः नाम किरीटी अस्ति ।

12- 'ब्र' अक्षरात् त्रीणि पुराणानि सन्ति ।

13. धर्मार्थकाममोक्षाः इति पुरुषार्थचतुष्टयं मन्यते ।

14- जीवलोकस्य षट्सुखेषु अर्थकरीविद्या नास्ति ।

15- स्वस्थे चित्ते बुद्धयः प्रस्फुरन्ति ।

———— x ————

इकाई – ५

प्र०५- रिक्तस्थान पूरयत-  1×7=7

( सततं , विद्या , विद्यासारं , आशु , पण्डितः , कर्मणः , महामना , विहनन्ति , तपस्विनं , सुकृतं , परोपकारः , व्यासस्य , वंशावल्या , पुरा, एकः

1- यस्य कृत्यं न---- शीतमुष्णं भयं रतिः ।
2. यमर्थान् नापकर्षन्ति स वै---- उच्यते ।
3. निश्चित्य यः प्रक्रमते नान्तर्वसति ---- ।
4- ---- ग्रन्थस्य वक्ता च यः सःपण्डितः उच्यते ।
5. अश्रुतश्च समुन्नद्धो दरिद्रश्च ---- ।
6. यद्यसन्तं---- यदि वा स्तेनमेव ।
7. आक्रोष्टारं निर्दहति ----चास्य विन्दति ।
8. आग्नेय हि पुराणेऽस्मिन् सर्वा---- प्रदर्शिता ।
9. विष्णु कालाग्निरुद्रोऽहं ---- वदामि ते ।
10. सुलभा पुरुषा राजन् ---- प्रियवादिनः
11- अष्टादशपुराणेषु ---- वचनद्वयम् ।
12- ---- पुण्याय पापाय परपीडनम् ।
13- -- नवं भवतीति पुराणम् ।
14. देवानाम् ऋषीणां च ----वर्णनम् ।
15. मा निषाद प्रतिष्ठां त्वम् अगमः शाश्वती---- ।

———×———×———

1×7 = 7

प्र०5- एकपदेन उत्तरत ?

प्र.1- दासीपुत्रः कः ?

प्र.2- धर्मराजस्य अवतारः कः ?

प्र०3- कति दोषाः परिहरेत ?

प्र०4- महामूर्खः किम् कथ्यते ?

प्र०5- गणदेवता-संख्या कति ?

प्र०6- महर्षि दत्तात्रेयँ हंस कुत्र विचरणं करोति ?

प्र०7- अग्निपुराणे कति श्लोकाः सन्ति ?

प्र०8- 'सर्गविषयक वर्णनम्' अग्नि पुराणे कस्मिन् अध्याये अस्ति ?

प्र०9- धृतराष्ट्रस्य माता नाम का ?

प्र०10- पाण्डुः कस्य पुत्रः आसीत् (माता नाम लिखत) ।

प्र.11- 'विदुर प्रजागर' इत्यस्य ग्रन्थस्य रचनाकारः कः ?

प्र.12- कालस्य गतिः कः जानाति ?

प्र.13- 'विदुरनीति' महाभारते कस्मिन् पर्वे वर्णिताः ?

प्र.14- नरकस्य द्वारं कति ?

प्र०15- स्वर्ग-प्राप्ति साधनं कति ?

—x—x—

इकाई- 6

2x10=20

प्र०6- एकवाक्येन उत्तरत ?

1- पुराणशब्दस्य व्युत्पत्ति लिखत ?

2- पुराणस्य पञ्चलक्षणेषु के के सम्मिलिता सन्ति ?

3- विद्यार्थिनां लक्षणं लिखत ?

4- कार्यसिद्धिः उपायः लिखत ?

5- चत्वारि कर्माणि लिखत ?

6- पंचाग्नि-नामानि लिखत ?

7. कस्य स्तुतिः कुर्यात् ?

8- शान्तिदूतरूपेण कः आगतः ?

9. संसर्गात्मकदोषस्य दहनं केन भवति ?

10. 'भारतम्' इति नाम कस्य राज्ञः नाम्ना समलङ्कृतमस्ति ?

11. वाल्मीकिमुखात् प्रथमः कः श्लोकः निर्गतः ?

12. प्रतिसर्गस्य कोऽर्थः ?

13. 'वंशानुचरितम्' किम् ?

14. सर्गः किम् ?

15. मन्वन्तराणि किम् ?

——— x ———

3×6=18

प्र7. लघुउत्तरीयाः प्रश्नाः ?

प्र०7-1. अग्निपुराणस्य मंगलाचरणं लिखत ?

2. ~~पण्डित~~ पण्डितस्य लक्षणानि लिखत ?

3. मूर्खस्य लक्षणानि लिखत ?

4. प्रह्लादस्य चरित्रचित्रणं कुरुत ?

5- विरोचनस्य चरित्रचित्रणं कुरुत ?

6. पुराणानां नामानि विलिख्य केषाञ्चित् चतुर्णां श्लोक संख्या लेखत ?

7. मानवैः धर्माचरणाय कस्य रक्षणं कर्त्तव्यम् ?

8. सर्वासां भाषाणां जननी का? व्युत्पत्ति लिखत ?

9. दानविधिं लिखत ?

10- "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" स्पष्टयत ?

11. वेदव्यासस्य अपरनामानि लिखत ?

12. कति वर्षैः कृष्णद्वैपायन मुनिः महाभारतं रचयामास ?

13. महाभारतस्य विकासक्रमः कति सोपानैः जातः ?

14. "वसुधैव कुटुम्बकम्" विषये लिखत ?

15. "सत्संगति कथय किं न करोति पुंसाम्" स्पष्टयत ?

— × —

4×3=12

अधोलिखितेषु
प्र० अन्वयम् कुरुत ?
(अ)

1- अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि सम्प्रवर्धन्ते आयुर्विद्या यशोबलम् ॥

2. यस्य दानर्जितं मित्रं शत्रवो युधि निर्जिताः ।
अन्नपानजिता दाराः सफलं तस्य जीवितम् ॥

3. प्रियं भवति दानेन प्रियवादेन चापरः ।
मन्त्रमूलबलेनान्यो यः प्रियः प्रियएव ॥

4. आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥

5- धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

6. उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥

7. कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर ॥

8. न दिष्टमभ्यतिक्रान्तुं शक्यं भूतेन केनचित् ।
दिष्टमेव ध्रुवं मन्ये पौरुषं तु निरर्थकम् ॥

—— x ——

# इकाई - 8

प्र० निम्नलिखितम् कुरुत -

(ब)

1- सृष्टि - उत्पत्ति विषये निबन्धं लिखत ?

2. 'गंगा' हिन्दुधर्मस्य संस्कृत्याः प्रतीकमस्ति , स्पष्टयत ?

3. नदीनाम् महत्वम् लिखत ?

4. सतां आचारः सदाचारः कथ्यते ?

5- विद्या ददाति विनयम् ?

6. भारतीय - संस्कृतिः

7. सांस्कृतिक - वैशिष्ट्यम्

8- वेदानां महत्वम्

— × — × —

प्र9 संस्कृते व्याख्या कुरुत ? 4×2=8

1- यतः प्राप्तः सञ्जयः पाण्डवेभ्यो न मे यथावन्मनसः प्रशान्तिः ।
सर्वेन्द्रियाण्यप्रकृतिं गतानि किं वक्ष्यतीत्येव मेऽद्य प्रचिन्ता ॥

2. कच्चिदेतैर्महादोषैर्न स्पृष्टोऽसि नराधिप ।
कच्चिच्च परवित्तेषु गृध्यन्न परितप्यसे ॥

3. राजलक्षणसम्पन्नस्त्रैलोक्यस्याधिपो भवेत् ।
प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र ! युधिष्ठिरः ॥

4. दुर्योधने सौबले च कर्णे दुःशासने तथा ।
एतेष्वैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥

5- द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते ।
अब्रुवन् परुषं किञ्चिदसतोऽनर्चयंस्तथा ॥

6. जाग्रतो दह्यमानस्य यत्कार्यमनुपश्यसि ।
तद् ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥

7. वनस्पतेरपक्वानि फलानि प्रचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति ॥

8. सेयं बुद्धिः परीता ते पुत्राणां भरतर्षभ ।
पाण्डवानां विरोधेन न चैनानवबुध्यसे ॥

9. यथाग्निर्मां पुरा प्राह मुनिभिर्दैवतैः सह ।
अग्निनोक्तं पुराणं यदाग्नेयं ब्रह्मसम्मितम् ॥

10. संसारसागरोत्तारनावं ब्रह्मेश्वरं वद ।
विद्यासारं यद्विदित्वा सर्वज्ञो जायते नरः ॥

11. मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक् ॥

—— × ——

# इकाई – 10

प्र०10 दीर्घोत्तरीयाप्रश्नाः 5x2=10

1- विदुरस्य जीवनचरितं वर्णनं महाभारतानुसारेण कुर्वन्तु ?

2- भीष्म-प्रतिज्ञा विषये लिखत ?

3- युधिष्ठिरस्य चरित्रचित्रणं कुरुत ?

4- अग्निपुराणस्य सन्दर्भे भारतवर्षस्य वर्णनम् कुरुत ?

5- किम् नाम पुराणम् ? व्युत्पत्तिपूर्वकं विशदं विवेचयत ?

6- पञ्च नीति-परक वाक्यांश लिखत ?

7- 'माघ-स्नान' महत्वम् लिखत ?

8- प्रयागस्य महत्वम् लिखत ?

9- महाभारतस्य प्रतिपाद्यविषयः कः ? विशदं विविच्यताम् ?

10- धृतराष्ट्र- विदुरसंवादस्य वर्णनं 'महाभारतानुसारेण' कुर्वन्तु ?

— x — x —